শ্রীঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী শঙ্করাচার্য ৱিরচিতম্
# ॥শ্রী গোৱিন্দাষ্টকম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে ৰামানুজায নমঃ

# ॥শ্ৰী গোৱিন্দাষ্টকম্ ॥

সত্যং জ্ঞানমনন্তং নিত্যমনাকাশং পৰমাকাশং
গোষ্ঠপ্ৰাঙ্গণৰিঙ্গণলোলমনাযাসং পৰমাযাসং।
মাযাকল্পিতনানাকাৰমনাকাৰং ভুৱনাকাৰং
ক্ষ্মামানাথমনাথং প্ৰণমত গোৱিন্দং পৰমানন্দম্॥ ১ ॥

মৃতস্নামতসীহেতি যশোদাতাডনশৈশৱ সন্ত্ৰাসং
ৱ্যাদিতৱক্ত্ৰালোকিতলোকালোকচতুৰ্দশলোকালম্।
লোকত্ৰযপুৰমূলস্তংভং লোকালোকমনালোকং
লোকেশং পৰমেশং প্ৰণমত গোৱিন্দং পৰমানন্দম্ ॥ ২ ॥

ত্ৰৈৱিষ্টপৰিপুৱীৰঘ্নং ক্ষিতিভাৰঘ্নং ভৱৰোগঘ্নং
কৈৱল্যং নৱনীতাহাৰমনাহাৰং ভুৱনাহাৰম্।
ৱৈমল্যস্ফুটচেতোৱৃত্তিৱিশেষাভাসমনাভাসম্
শৈৱং কেৱলশান্তং প্ৰণমত গোৱিন্দং পৰমানন্দম্॥ ৩ ॥

গোপালং ভূলীলাৱিগ্ৰহগোপালং কুলগোপালং
গোপীখেলনগোৱৰ্ধনধৃতিলীলালালিতগোপালম্।
গোভিৰ্নিগদিত গোৱিন্দস্ফুটনামানং বহুনামানং
গোপীগোচৰদূৰং প্ৰণমত গোৱিন্দং পৰমানন্দম্॥ ৪ ॥

গোপীমণ্ডলগোষ্ঠীভেদং ভেদাৱস্থমভেদাভং
শশ্বদ্গোখুৰনিৰ্ধূতোতকৃতধূলীধূসৰসৌভাগ্যম্।
শ্ৰদ্ধাভক্তিগৃহীতানন্দমচিন্ত্যং চিন্তিতসদ্ভাৱং
চিন্তামণিমহিমানং প্ৰণমত গোৱিন্দং পৰমানন্দম্॥ ৫ ॥

স্নানৱ্যাকুলযোষিদ্বস্ত্ৰমুপাদাযাগমুপাৰূঢং
ৱ্যাদিতসন্তীৰথ দিগ্বস্ত্ৰা দাতুমুপাকৰ্ষন্তম্ তাঃ।
নিৰ্ধূতদ্বযশোকৱিমোহং বুদ্ধং বুদ্ধেৰন্তসস্থং
সত্তামাত্ৰশৰীৰং প্ৰণমত গোৱিন্দং পৰমানন্দম্॥ ৬ ॥

কান্তং কারণকারণমাদিমনাদিং কালমনাভাসং
    কালিন্দীগতকালিযশিরসি মুহুর্নৃত্যন্তং সুনৃত্যন্তম্।
কালং কালকলাতীতং কলিতাশেষং কলিদোষঘ্নং
    কালত্রযগতিহেতুং প্রণমত গোৱিন্দং পরমানন্দম্॥ ৭ ॥

ৱৃন্দাৱনভুৱি ৱৃন্দারকগণৱৃন্দারাধ্যং ৱন্দেহং
    কুন্দাভামলমন্দস্মেরসুধানন্দং সুহৃদানন্দম্।
ৱন্দ্যাশেষমহামুনিমানসৱন্দ্যানন্দপদদ্ৱন্দ্ৱং
    ৱন্দ্যাশেষগুণাব্ধিং প্রণমত গোৱিন্দং পরমানন্দম্॥ ৮ ॥

গোৱিন্দাষ্টকমেতদধীতে গোৱিন্দার্পিতচেতা যো
    গোৱিন্দাচ্যুত মাধৱ ৱিষ্ণো গোকুলনাযক কৃষ্ণেতি।
গোৱিন্দাঙ্ঘ্রিসরোজধ্যানসুধাজলধৌতসমস্তাঘো
    গোৱিন্দং পরমানন্দামৃতমন্তস্স্থং স সমভ্যেতি॥ ৯ ॥

॥ইতি শ্রী গোৱিন্দাষ্টকম্ সমাপ্তম্॥